## ॥ भागवतधर्मस्तोत्रम् ॥

यत् एव इहैव वसंति सुखं सुखतीर्थसुतीर्थसुवृद्दिपराः ।
नहि कालबलं हरिपादरजोधुतपापगणेषु जनेषु सदा ॥ १ ॥

ललनालयबालसुचैलमुखं तुलयंति लवेन न चात्र यतः ।
नहि कालबलं हरिपादरजोधुतपापगणेषु जनेषु सदा ॥ २ ॥

यदिहैवसुदुस्त्यजमानमिदं कुणपेन समं कलयंति कलौ ।
नहि कालबलं हरिपादरजोधुतपापगणेषु जनेषु सदा ॥ ३ ॥

यदलंमतयः कणचूर्णपयस्त्णमूलपलाशफलांबुमुखैः
नहि कालबलं हरिपादरजोधुतपापगणेषु जनेषु सदा ॥ ४ ॥

स्वपरार्पितदुर्वचवाक्तयो यधिहैव भवंति समाः कुसुमैः ।
नहि कालबलं हरिपादरजोधुतपापगणेषु जनेषु सदा ॥ ५ ॥

विधिवाग्विनिषेधवचोऽपि ह्यदा स्वनिवेद्यमिहैव निवेदयति ।
नहि कालबलं हरिपादरजोधुतपापगणेषु जनेषु सदा ॥ ६ ॥

अपि कर्कशतर्कमुखैरपि यद्दरिरेव विभाति वचोभिहिरिह ।
नहि कालबलं हरिपादरजोधुतपापगणेषु जनेषु सदा ॥ ७ ॥

यदमुत्रयमोऽपि समः सखिभिर्भवतीशपदानुगजातयुतः ।
नहि कालबलं हरिपादरजोधुतपापगणेषु जनेषु सदा ॥ ८ ॥

॥ इति श्री (मदनूरु) विष्णुतीर्थविरचितं भागवतधर्मस्तोत्रम् ॥

॥ भारतीरमणमुख्यप्राणांतर्गत श्री कृष्णार्पणमस्तु ॥